**दिनाङ्क :- 10.06.2025**

**सायम् :- 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः - जतिनशर्मा**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना आधुनिकीकरणं आत्मनिर्भरतां चालक्ष्य ध्यानं केन्द्रितम् सहैव विगतेष्वेकादशवर्षेषु भारतस्य रक्षाक्षेत्रे उल्लेखनीयपरिवर्तनं प्रशंसितम्।
- विदेशमन्त्रिणा डॉ. जयशंकरेण प्रतिपादितं यत् भारतदेशोपरि आतंकिनां आक्रमणं न कदापि सहिष्यते।
- उत्तर-पश्चिमभारते भीषण-तापतरंगस्य प्रकोप: समारब्ध:, ऋतुविज्ञान- विभागेन ऑरेंज अलर्ट इति संचेतना प्रसारिता।
- ऑस्ट्रियायां अद्य एकस्मिन् वरिष्ठ-विद्यालये सञ्जाते गोलिका-प्रहारे न्यूनातिन्यूनं [illegible]श-जनाः मृताः।
- आस्ट्रियन्- रेसवॉकिंग्-चैम्पियनशिप्-क्रीडायां महिलासु प्रथमं स्थानम् प्रियंका गोस्वामिना प्राप्तम् ।

**अथवार्ता: विस्तारेण**

**प्रधानमन्त्री-रक्षाक्षेत्रम्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना विगतेष्वेकादशवर्षेषु भारतस्य रक्षाक्षेत्रे उल्लेखनीयपरिवर्तनं प्रकाशितम्। सोशल-मीडियासन्देशे प्रधानमन्त्रिणा कथितं यत् केन्द्रेण रक्षोत्पादने आधुनिकीकरणं आत्मनिर्भरतां चालक्ष्य ध्यानं केन्द्रितमस्ति। तेन कथितं यत् एतत् उत्साहजनकं दृश्यं भविष्यति यत् कथं भारतीयजनाः राष्ट्रस्य सुदृढीकरणाय एकत्रिताः भवन्ति । रक्षामन्त्रिणा राजनाथ- सिंहेन प्रोक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे विगतेष्वेकादशवर्षेषु भारतस्य रक्षाक्षेत्रे ऐतिहासिकं परिवर्तनम् अभवत् । सोशलमीडिया-सन्देशे श्रीसिंहेन प्रकाशितं यत् प्रधानमन्त्रिणः नेतृत्वे क्षेत्रमिदं वैश्विकविश्वासस्य परिणामस्वरूपं आत्मनिर्भरतादिशि उत्तरोत्तरं समेधते।

**जयशंकर:**

विदेशमन्त्रिणा डॉ. जयशंकरेण प्रतिपादितं यत् यदि भारतदेशे आतंकिनां आक्रमणं भवति तर्हि आक्रमणकारिण: नैव विमोचयिष्यन्ते। विदेशमन्त्रिणा स्वीय फ्रांस-यात्रावधौ वक्तव्यम् इदं प्रदत्तम्। तेन इदं सबलं प्रतिपादितं यत् पाकिस्तानेन सार्धं स्वीय दृढ-सम्बन्ध सन्दर्भे चीनदेश: आतंकवादं उत्पाटयितुं स्वीय अस्पष्टताया: मापदण्डम् नैव सहिष्यते। तेन इदमपि भणितं यत् कोविड-महामार्या:

अनन्तरं निलम्बित-वैमानिक-सेवा: पुन: प्राटब्धुं चर्चा संजाता। तत्र जयशंकरेण लक्जमबर्ग-balgium देशे भारतीय-समुदाययीय-प्रतिनिधिभि: साकं सम्भाषणं जातम्।

**शिक्षामन्त्री-हैदराबादः**

केन्द्रीय-शिक्षामन्त्री धर्मेन्द्रप्रधानः प्रोक्तवान् यत् वैज्ञानिकेभ्यः नवोन्मेषकेभ्यः नीतिनिर्मातृभ्यः अयं उपयुक्तसमयः वर्तते। समेऽपि एकीभूय समावेशी-पारिस्थितिकीतन्त्रस्य सुदृढीकरणं कर्तुमर्हन्ति येन अशक्तजनानां सशक्तीकरणं भविष्यति। हैदराबादे युव-वैज्ञानिकानाम् अन्ताराष्ट्रिय- सम्मेलनस्य ग्लोबल यंग अकादमी इत्यस्य च वार्षिकोपवेशनं सम्बोधयता श्रीप्रधानेन वैज्ञानिकानां विकसित-भारतस्य मानव-केंद्रित विकासस्य च दृष्ट्या सह कार्यं कर्तुं आह्वानम् कृतम्।

**भारतीय-ऋतुविभागः**

भारत-ऋतु-विभागेन अद्य दिल्ली-हरियाणा-चण्डीगढ- जम्मू-कश्मीर-लद्दाख- मध्यप्रदेश-पञ्जाब-राजस्थान उत्तरप्रदेशेषु तापतरङ्गस्य पूर्वानुमानं प्रकटितम्। विभागेन आगामिदिनद्वयोः कृते औरेंज-अलर्ट-सञ्चेतना प्रसारिता। विभागेन तापतरङ्गैः स्वस्य रक्षणार्थम् जनाः सञ्चेतिताः। राजस्थाने अनेकेषु मण्डलेषु अधिकतमं तापमानं पञ्चचत्वारिंशत्-डिग्री- सेल्सियसमितात् अधिकं तापमानम् भविष्यति, येन सामान्यजीवनं प्रभावितम् भवितुमर्हति । जम्मू-प्रदेशे तापतरङ्गस्य परिस्थितयः अद्यापि व्याप्ताः सन्ति । साम्बामण्डले सर्वाधिक-तापमानं प्रायः सार्द्ध- षड्चत्वारिंशत्-डिग्री-सेल्सियसमितम् अभवत्, श्रीनगरे त्रयस्त्रिंशत्-डिग्री-सेल्सियस उच्चतमतापमानं समङ्कितम् ।

**ऑस्ट्रिया**

ऑस्ट्रियायां अद्य एकस्मिन् वरिष्ठ-विद्यालये सञ्जाते गोलिका-प्रहारे न्यूनातिन्यूनं दश-जना: मृता:। स्थानीय वार्ताहर-विवरणानुसोण अस्यां घटनायां विद्यार्थिन:, अध्यापका: च समविष्टा: आसन्। आरक्षिदलेन् तत्र सफलतया परीक्षणम् अपि कृतम्।

**गोयल स्विट्ज़र्लैण्ड्**

केन्द्रीयवाणिज्य-उद्योगमन्त्री पीयूषगोयलः स्विट्ज़र्लैण्ड-देशस्य यात्रावधौ भारत-ईएफटीए-व्यापार-आर्थिक-सहभागिता-सन्धि-विषये विचारं कृतवान्। सोशल मीडिया-सन्देशे श्रीगोयलः उक्तवान् यत् सः सहभागितया उत्पन्नानां भारत-स्विट्जर्लैण्ड्-देशयोः मध्ये व्यापारस्य निवेशस्य च अवसरेषु, सहभागितासु, उदीयमानमार्गेषु च चर्चां कृतवान् वार्ताहरैः सह वार्तालापं कुर्वन् मन्त्री अवदत् यत् अद्यत्वे विश्वं भारतं न केवलं विश्वस्य द्रुततरं वर्धमानं बृहत् अर्थव्यवस्थां अपितु व्यापारं कर्तुं सर्वोत्तमस्थानं अपि स्वीकरोति। सः अवदत् यत् भारतम् अधुना सर्वाधिकं प्राधान्यं निवेशस्य गन्तव्यं वर्तते।

## जम्मूकश्मीर-आतंकी

जम्मूकश्मीरे राजौरी जनपदे सुरक्षाबलैः आतंकिनां निगडन क्षेत्रं ध्वस्तीकृतम्। इदं आतंकिनां सुरक्षाभटानां मध्ये संयुक्त - अन्वीक्षकाभियानं वर्तते। सम्बद्ध जनाः साम्प्रतं यावत् नैव धृताः ।

## इंटरनेशनल स्पेस

इंटरनेशनल स्पेस स्टेशन इत्यस्य कृते Axiom- चतुर्-मिशनस्य प्रक्षेपणं ऋतो: दुष्प्रभावेण एकदिनस्य कृते स्थगनं जातम्। भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनेन (इसरो) एषा सूचना सोशल मीडियातः प्रदत्ता । इस्रो इत्यस्य प्रमुखस्य डॉ. वी. नारायणन: post इत्यत्र लिखितवान् यत्, ' ऋतु - स्थितिकारणात् भारतीयगगन्यात्रीन् अन्ताराष्ट्रीय-अन्तरिक्ष-स्थानकं प्रति प्रेषयितुं एक्सिओम्-चतुर्-मिशनस्य प्रक्षेपणं जून-मासस्य दशदिनाङ्कस्य स्थाने एकादशजून-दिनाङ्कं यावत् स्थगितम् , अग्रिमः प्रक्षेपणसमयः जून-मासस्य एकादश दिनाङ्के सायं सार्ध पञ्चवादने अस्ति

## दिल्ल्या:-अग्निकाण्ड

अद्य दिल्ल्याः द्वारका सैक्टर-त्रयोदश साबाद - अपार्टमेंट - इत्यस्य सप्तमे तले एकस्याम् अग्नि-दुर्घटनायां बालक द्वयं समेत्य जनः एकः मृत्युपगतः । दिल्ली अग्नि-सेवा- प्रभागेन घटना-सन्दर्भेऽस्मिन् प्रतिपादितं यत् सप्तजनाः सप्तम तलात् अधः निपतिताः चिकित्सालये च मृता इति सूचिता:।

## रेसवॉकिंग्-चैम्पियनशिप्

आस्ट्रियन्- रेसवॉकिंग्-चैम्पियनशिप्-क्रीडायां महिलासु प्रथमं स्थानम् अस्ति प्रियंका गोस्वामिनः। गोस्वामी दशकीलोमीटरमितस्य धावनम् मिनिट् चतु: पञ्चाशत् क्षणोत्तर सप्तचत्वारिंशत् निमेषेषु कृतवती ।

**।। इति वार्ता: ।।**